# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा - एप्रिल् २०१९

| | | |
|---|---|---|
| **कक्षा**-आचार्य-1(SEM-2) | **प्रश्नपत्रम्** - ३ (New & Old) | **गुणाः** - ७० |
| **विषयः** - वास्तुशास्त्रम् | **कोड- CC- 425** | **समयः** - ११ तः २ |
| **दिनाङ्कः** - १२/०४/२०१९ | **सन्दर्भग्रन्थः**- समराङ्गणसूत्रधारः | |

**॥ प्रथमान्वितिः ॥** (Unit-1)

**प्रश्नः १ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत । ०५**

१ अष्टोत्तरशतं ज्येष्ठं मह्यं स्यान्नवतिं करान् ।
जघन्यं सप्ततिकरान् राजवेश्म प्रशस्यते ॥

२ विधाय भूमिकाः पञ्च शय्या त्वादिभुवि स्थिता ।
प्रतिप्रहरमन्यासु सर्पन्ती याति पञ्चमीम् ॥

**प्रश्नः २ कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

१ राजगृहविचारः ।

२ जगशाखाविचारः ।

**॥ द्वितीयान्वितिः ॥** (Unit-2)

**प्रश्नः ३ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत । ०५**

१ राज्ञां सेनापतीनां च वर्णिनामपि वेश्मसु ।
यदि वा वास्तुकक्षासु सभादेवकुलेषु च ॥

२ वर्णानां यानि दारुणि कीलकार्थं नियोजयेत् ।
इदानीं तानि वक्ष्यामि श्रेयः कीर्तिहिताय च ॥

**प्रश्नः ४ कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

१ द्वारगुणदोषविचारः ।

२ शान्तिकर्मविधिः ।

**॥ तृतीयान्वितिः ॥** (Unit-3)

**प्रश्नः ५ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत । ०५**

१ भङ्गो यत्रोर्ध्ववंशस्य तत्र राजा विनश्यति ।
अर्गलापीलिकाकुञ्चीभङ्गे च नवकर्मणि ॥

२ शास्त्रं कर्म प्रथा प्रज्ञा शीलं च क्रिययान्वितम् ।
लक्ष्यलक्षणयुक्तार्थशास्त्रनिष्ठो नरो भवेत् ॥

**प्रश्नः ६ कस्यचिदेकस्योपरि निबन्धं लिखत । १०**

१ स्थपतिलक्षणम् ।

२ अष्टाङ्गलक्षणम् ।

## ॥ चतुर्थान्वितिः ॥ (Unit-4)

**प्रश्नः ७ अधोलिखितयोः कस्यचिदेकस्य सान्वयं व्याख्यां कुरुत । ०५**

१ चतुरस्त्रीकृते क्षेत्रे चतुर्भागविभाजिते ।
कुर्यात् स्वारोहकाश्वासं पीठमंशसमुद्धृतम् ॥

२ स्वसृणां मातुलानां च कुमाराणां तथा क्रमात् ।
आग्नेय्यां द्विजमुख्यानां विधातव्यं निवेशनम् ॥

**प्रश्नः ८ अधोलिखितयोः कमप्येकं प्रश्नं सविस्तरं निरूपयत । १०**

१ प्रासादशुभाशुभलक्षणम् ।

२ आयतननिवेशः ।

**प्रश्नः ९ निम्नाङ्कितेषु दशप्रश्नानाम् अतिलघूत्तराणि यच्छत । १०**

१ नृपगृहस्य कति हस्तमानमुत्तमं भवति?

२ समराङ्गणसूत्रधारस्य रचनाकारस्य नाम लिखत ।

३ गजशालायां भित्तौ कति वातायनानि अभीष्टानि भवन्ति?

४ आग्नेय्यां यदा अश्वशालायाः द्वारं स्यात्तदा फलं शुभम् अशुभं वा?

५ कस्मिन्नयने शिलान्यासः शुभो भवति?

६ कस्मिन् लग्ने शिलान्यासः करणीयः?

७ रेवतीनक्षत्रे शिलान्यासः कर्तव्यः न वा?

८ कस्मिन् कोणे शिलान्यासः करणीयः?

९ बलिदानविधौ प्रथमं कस्मै देवाय बलिदानम्?

१० वास्तुपुरुषस्य कति अङ्गानि सन्ति?

११ दुर्गः कतिविधः भवति?

१२ गृहस्य मध्यभागे कस्य देवस्य स्थानं भवति?

१३ वेद्यः कतिप्रकारिकाः भवन्ति?

१४ विवाहे कस्याः वेद्याः प्रयोगः क्रियते?

१५ देवतास्थापने कस्याः वेद्याः प्रयोगः क्रियते?

०००